इत्यमरटीकायां स्वामी ॥ शस्तः । भूषितः । इति मेदिनी ॥ शोधितः । इति जटाधरः ॥ ( यथा, देवीभागवते । १ । २ । ११ ।
"पुराणमुत्तमं पुण्यं श्रीमद्भागवताभिधम् ।
अष्टादशसहस्राणि श्लोकास्तत्र तु संस्कृताः॥")

संस्क्रिया, स्त्री, ( सं+कृ+"कृञः श च ।" ३ । ३ । १०० । इति शः । ) शवदाहादिक्रिया । इति त्रिकाण्डशेषः ॥ संस्कारश्च ॥

संस्तरः, पुं, ( संस्तीर्य्यते इति । सं+स्तृ+अप् । ) शय्या । यज्ञः । इति हेमचन्द्रः ॥ पल्लवादिरचितशय्या । इति शब्दरत्नावली ॥ ( यथा, रघुः । ८ । ५७ ।
"नवपल्लवसंस्तरेऽपि ते
मृदु दूयेत् यदङ्गमर्पितम् ।
तदिदं विषहिष्यते कथं
वद वामोरु चिताधिरोहणम् ॥")

संस्तवः, पुं, ( सं+स्तु+अप् । ) परिचयः । इत्यमरः ॥ ( यथा, किराते । ४ । २५ ।
"विहाय वाञ्छामुदिते मदात्यया-
दरक्तकण्ठस्य रुते शिखण्डिनः ।
श्रुतिः श्रयत्युन्मदहंसनिःस्वनं
गुणाः प्रियत्वेऽधिकृता न संस्तवः ॥")
सम्यक्स्तुतिश्च ॥ (यथा, भागवते ।११।१३।१४।
"इति मे छिन्नसन्देहा मुनयः सनकादयः ।
समाजयित्वा परया भक्त्या गृणत संस्तवैः ॥")

संस्तवानः, त्रि, ( संस्तवीतीति । सं+स्तु+"सम्यानच् स्तुवः ।" उणा० ३ । ८९ । इति आनच् ।) सद्वक्ता । इत्युणादिकोषः ॥ वाग्मी । उद्गाता । हर्षः । इति संक्षिप्तसारोणादिवृत्तिः॥

संस्तावः, पुं,(समेत्य स्तुवन्ति यस्मिन् देशे छन्दोगा इति । सम्+स्तु+"यज्ञे समि स्तुवः ।" ३ । ३ । ३१ । इति घञ् । ) क्रतुषु द्विजन्मनां स्तुतिभूमिः । इत्यमरः ॥ यज्ञेषु स्तुतिकारिणां ब्राह्मणानां अवस्थानभूमिः संस्ताव उच्यते । क्रतुषु यज्ञविषयेषु द्विजानां या स्तुतिभूमिः स्थानं स संस्ताव इत्यन्वयः । समेत्य स्तूयते छन्दोगैरत्र इति संस्तावः घञ् । इति भरतः ॥

संस्तुतः, त्रि, (सं+स्तु+क्तः ।) सम्यक्प्रकारेण स्तुतिगोचरः । सम्यक्स्तवविषयीभूतः । यथा,—
"भूयश्च शतवार्षिक्यामनावृष्ट्यामनम्भसि ।
मुनिभिः संस्तुता भूमौ सम्भविष्याम्ययोनिजा॥"
इति देवीमाहात्म्यम् ॥

संस्त्यायः, पुं, (सं+स्त्यै+घञ् । आतो युक् ।) संघातः । सन्निवेशः । इत्यमरः ॥ संस्थानम् । विस्तृतिः । इति मेदिनी ॥ गृहम् । इति हेमचन्द्रः ॥

संस्थः, पुं, (संतिष्ठते स्वपरराष्ट्रेषु इति । सं+स्था+कः । ) चरः । इति मेदिनी ॥ निजराष्ट्रकः इति हेमचन्द्रः ॥ ( यथा, कामन्दकीये । १२ । ३६ ।
"संस्थाः स्युश्चारसंस्थित्यै दत्तदायाः शुभाशयाः ॥")

संस्थः, त्रि, (संतिष्ठते इति । सं+स्था+कः ।) अवस्थितः । इति मेदिनी ॥ ( यथा, हरिवंशे भविष्यपर्व्वणि । ८ । ६६ ।
"यदा मे मरणं भूयात् तदा मा भूत् स्मृतिभ्रमः।
दिने दिने क्षणं चित्तं त्वयि संस्थं भवत्विति ॥")
मृतः । इति शब्दरत्नावली ॥

संस्था, स्त्री, ( संतिष्ठतेऽनयेति । सं+स्था+अङ् । ) न्याय्यपथस्थितिः । इत्यमरः ॥ सन्तिष्ठतेऽनया सम्यगवस्थानं वा संस्था । इति भरतः ॥ अस्याः पर्य्यायो मर्य्यादाशब्दे द्रष्टव्यः॥ ( यथा, उपदेशशतके । ९० ।
"अपि शक्तः परिहर्त्तुं ययातिशापं हरिर्हतं कंसे ।
राजासनं न भेजे पुरातनीं पालयेत् संस्थाम्॥"
प्रतिज्ञा । यथा, रघुः । ११ । ३८ ।
"तस्य वीक्ष्य ललितं वपुः शिशोः
पार्थिवः प्रथितवंशजन्मनः ।
स्वं विचिन्त्य च धनुर्दुरानमं
पीड़ितो दुहितृशुल्कसंस्थया ॥")
स्थितिः सादृश्यम् । नाशः । इति मेदिनी ॥ व्यवस्था । ( यथा, मनुः । १ । २१ ।
"सर्व्वेषान्तु स नामानि कर्म्माणि च पृथक् पृथक् ।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्म्ममे ॥")
व्यक्तिः । क्रतुभेदः । (यथा, भागवते । १० । २३ । ८ ।
"दीक्षायाः पशुसंस्थायाः सौत्रामण्याश्च सत्तमाः ।
अन्यत्र दीक्षितस्यापि नान्नमश्नन् हि दुष्यति॥"
समाप्तिः । इति हेमचन्द्रः ॥ प्रलयचतुष्टयम् । यथा,—
"नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः ।
संस्थेति कविभिः प्रोक्तश्चतुर्धास्य स्वभावतः ॥"
इति पुराणम् ॥

संस्थानं, क्ली, (सं+स्था+ल्युट् ।) सन्निवेशः । ( यथा, मनुः । ८ । ३७१ ।
"भर्त्तारं लङ्घयेत् या तु स्त्री ज्ञातिगुणदर्पिता ।
तां श्वभिः खादयेद्राजा संस्थाने बहुसंस्थिते॥")
चतुष्पथः । इत्यमरः ॥ आकृतिः । मृत्युः । इति मेदिनी ॥ चिह्नम् । इत्यजयपालः॥ सम्यक्स्थितिश्च ॥ ( व्यवस्था । यथा, भागवते । ३ । ९ । २७ ।
"लोकसंस्थानविज्ञान आत्मानं परिखिद्यतः ।
तमाहागाधया वाचा कश्मलं शमयन्निव ॥")

संस्थापनं, क्ली, ( सं+स्था+णिच्+ल्युट् । ) सम्यक्स्थितिप्रापणम् । स्थिरीकरणम् । यथा,
"परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्म्मसंस्थापनार्थाय संभवामि युगे युगे ॥"
इति भगवद्गीतायाम् ४ अध्यायः ॥
"साधुरक्षणेन दुष्टवधेन च धर्म्मं स्थिरीकर्त्तुम् ।"
इति तट्टीकायां श्रीधरस्वामी ॥

संस्थितः, त्रि, (सं+स्था+क्तः ।) मृतः । इत्यमरः ॥ ( यथा, मनुः । ९ । १९० ।
"संस्थितस्यानपत्यस्य सगोत्रात् पुत्त्रमाहरेत् ।
यत्र यद्रिक्थजातं स्यात् तत्तस्मिन् प्रतिपादयेत् ॥")
सम्यक्स्थितिविशिष्टश्च ॥ (यथा,कौर्म्मे ।१।२१।
"इदन्तु पञ्चदशमं पुराणं कौर्म्ममुत्तमम् ।
चतुर्द्धासंस्थितं पुण्यं संहितानां प्रभेदतः ॥"

संस्थितिः, स्त्री, ( सं+स्था+क्तिन् । ) संस्थानम् । ( यथा, मनुः । ६ । ९० ।
"यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम् ।
तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम्॥"
मृत्युः । गृहम् । इति केचित् ॥

संस्पर्शः, पुं, ( सं+स्पृश+घञ् । ) सम्यक्स्पर्शः । स तु त्वगिन्द्रियग्राह्यगुणविशेषः । यथा, छागलेयः ।
"आलापात् गात्रसंस्पर्शात् निश्वासात् सहभोजनात् ।
सहशय्यासनाध्यायात् पापं संक्रमते नृणाम् ॥"
इति प्रायश्चित्तविवेकः ॥

संस्पर्शा, स्त्री, ( संस्पृश्यतेऽसौ इति । सं+स्पृश+कर्म्मणि घञ् । टाप् । ) जनीनामगन्धद्रव्यम् । इत्यमरः ॥

संस्फालः, पुं, ( सम्यक् स्फालः स्फुरणं यस्य । ) मेषः । इति त्रिकाण्डशेषः ॥

संस्फुटः, त्रि, (संस्फुटतीति । सं+स्फुट+इगुपधेति कः ।)विकसितः । इति शब्दरत्नावली॥

संस्फेटः, पुं, (सं+स्फिट अनादरे+अधिकरणे घञ् । ) युद्धम् । इत्यमरटीकायां भरतः ॥

संस्फोटः, पुं,(संस्फोटत्यत्रेति । सं+स्फुट् भेदने+घञ् । ) युद्धम् । इत्यमरः ॥

संस्मरणं, क्ली, ( सं+स्मृ+ल्युट् । ) संस्मृतिः । संस्कारजन्यज्ञानम् । यथा, योगियाज्ञवल्क्यः ।
"ध्यायेन्नारायणं नित्यं स्नानादिषु च कर्मसु ।
तद्विष्णोरिति मन्त्रेण स्नायादप्सु पुनः पुनः ॥
गायत्त्री वैष्णवी ह्येषा विष्णोः संस्मरणाय वै ।"
इति तिथ्यादितत्त्वम् ॥

संस्मृतिः, स्त्री, संस्मरणम् । संपूर्वस्मृधातोः क्तिन्प्रत्ययेन निष्पन्ना ॥ ( यथा, कथासरित्सागरे । ५५ । २०६ ।
"तच्छ्रुत्वा संस्मृतिं लब्ध्वा स राजा प्रत्युवाच तम् ॥")

संहतः, त्रि, ( सं+हन+क्तः । ) दृढ़सन्धिः । इत्यमरः ॥ मिलितः । दृढ़ः । इति मेदिनीकरहेमचन्द्रौ ॥ सम्यक्प्रकारेण हतश्च ॥

संहतजानुः, त्रि, ( संहते जानुनी यस्य । ) लग्नजानुकः । यथा,—
"प्रज्ञुः प्रगतजानुः स्यात् प्रज्ञोऽर्वाच इष्यते
संज्ञुः संहतजानुश्च भवेत् संज्ञोऽपि तत्र हि ।
ऊर्द्ध्वज्ञुरूर्द्ध्वजानुः स्यादूर्द्ध्वज्ञोऽप्यूर्द्ध्वजानुकः ॥"
इति भरतधृतसाहसाङ्कः ॥